# Ratnakarakrita Shiva Stuti

# रत्नाकरकृता शिवस्तुतिः

## Document Information

Text title : Ratnakarakrita Shiva Stuti

File name : ratnAkarakRRitAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 37 | 70-83 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# रत्नाकरकृता शिवस्तुतिः

रत्नाकरः -
क्व महेश्वरता क्व शम्भुता क्व कृपासागरता क्व चाज्ञता ।
क्व निरन्तरदीनबन्धुता क्व शिवाद्याप्यकृपैव मय्यपि ॥ ७० ॥

क्व चतुर्दशलोकनाथता त्रिदशाधीश्वरता दयार्द्रता ।
क्व विलक्षणदक्षतापि ते क्व शिवाद्याप्यकृपैव मय्यपि ॥ ७१ ॥

क्व ललाटकृपीठयोनिता क्व जटाजूटतटेन्दुखण्डता ।
क्व तटित्तटिनीवधूटिता क्व शिवाद्याप्यकृपैव मय्यपि ॥ ७२ ॥

क्व तवामितवेदवेद्यता क्व तवापारगुणाम्बुराशिता ।
क्व विपद्गणशैलवज्रता क्व शिवाद्याप्यकृपैव मय्यपि ॥ ७३ ॥

क्व तवाद्भुतभूतिहेतुना क्व विभूतिव्रतपूतता तथा ।
क्व तवामितपुण्यकीर्तिता क्व शिवाद्याप्यकृपैव मय्यपि ॥ ७४ ॥

क्व सुरासुरवर्गवन्द्यता क्व महाशैवमहार्हणार्थता ।
क्व महोत्सवदानलोलता क्व शिवाद्याप्यकृपैव मय्यपि ॥ ७५ ॥

क्व तव त्रिपुरप्रहारिता क्व महाशूलविराजमानता ।
क्व सुमेरुपिनाकपाणिता क्व शिवाद्याप्यकृपैव मय्यपि ॥ ७६ ॥

क्व तवामरसुन्दरीकरप्रकरापारसरोजपूज्यता ।
क्व सुमेरुशरासनज्यता क्व शिवाद्याप्यकृपैव मय्यपि ॥ ७७ ॥

क्व भवाम्बुधिकर्णधारता क्व महामृत्युभयापहारिता ।
क्व शिवार्चककल्पवृक्षता क्व शिवाद्याप्यकृपैव मय्यपि ॥ ७८ ॥

क्व तवामितकालकालता क्व हालाहलनीलकण्ठता ।
क्व दिगम्बरतापि सांवता क्व शिवाद्याप्यकृपैव मय्यपि ॥ ७९ ॥

क्व परात्परतापि मित्रता क्व वरोरःसरराजहारता ।

क्व तवोन्नतपञ्चवक्त्रता क्व शिवाद्याप्यकृपैव मय्यपि ॥ ८० ॥

क्व शिवार्चकजीवनार्थिता क्व महापापवनाग्निताऽपि ते ।
क्व शिवव्रतचित्तसङ्गिता क्व शिवाद्याप्यकृपैव मय्यपि ॥ ८१ ॥

किं त्वत्कारुणिकत्वमप्यघकुलारण्यानलत्वं च ते
किं तद्भुक्तिदमोक्षदत्वमपि ते नीतं गतं वा स्वतः ।
तच्चेदस्ति वशे तवापि किमिति त्वत्पादुकाराधकं
मामप्येवमुपेक्ष्य तिष्ठसि कथं श्रीनीलकण्ठाधुना ॥ ८२ ॥

विश्वस्येन्दुकलावतंसमसकृद्बिल्वीदलैः कोमलैः
गङ्गातुङ्गतरङ्गशीतलजलैर्वरेशलिङ्गं मुदा ।
प्राणाद्यैरुपहारतामुपगतैरभ्यर्चितं किं मया श्रीविश्वेश
न दुर्दशा परिहृता संसारजातार्जिता ॥ ८३ ॥

॥ इति शिवरहस्यान्तर्गते रत्नाकरकृता शिवस्तुतिः सम्पूर्णा सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । हराख्यः तृतीयांशः । उत्तरार्धम् । अध्यायः ३७। ७०-८३ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 37. 70-83 ..

Notes:
Ratnākara रत्नाकर; feeling forlorn, beseeches Śiva शिव to have mercy on him.

Proofread by Ruma Dewan

*Ratnakarakrita Shiva Stuti*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*